1

॥श्री॥

अद्य पूर्वोच्चरित एवं गुणविशिष्टायां शुभ पुण्यतिथौ मम आत्मनः
श्रुतिस्मृति पुराणोक्त फलप्राप्त्यर्थं श्रीमहाकाली महालक्ष्मी महा
सरस्वतीत्रिगुणात्मिका श्रीविजयादुर्गा प्रीत्यर्थं शरणागतेति
मंत्रस्य अष्टोत्तर शत जप महं करिष्ये — ॐ शरणागत दीनार्त
परित्राण परायणे सर्वस्यार्तिहरे देवी नारायणि न
मोस्तुते ॥ श्री विजयादुर्गायै प्रीयतां न मम — ३

९ ८

॥तैत्तीरियसंध्याभाष्य॥
पत्राणी१०समग्र

श्रीगणेशायनमः॥ विद्यार्थं सर्ववेदांतैः संचार्यं तत्पदांबुजे॥ प्रचार्यं सर्वलोकेषु त्यागार्थं शंकरं भजे॥१॥ पद्मपादो विश्वरूपो हस्तामल
कत्रोटकौ॥ अद्वैतदीक्षागुरवः साचार्याः पंचमोत्तमाः॥२॥ नारायणोद्भवादात्वं विधिं द्भवरणांबुजं॥ नृसिंहे द्रूप रोभोजं केवल्येंद्रपदांबुजं॥३॥
एताभिपद्मरत्नाभिचलाशिरस्त्वरपांबुजे॥ सामश्रीनेमकाशांतां भुक्तिमुक्तिप्रसिद्धये॥४॥ अथ तैत्तिरीयशाखानां पांश्रोतस्मार्तानुष्ठानप्र
धानभूतसंध्या[illegible]॥ वंदनकर्मणि विनियुक्ता मंत्रा व्याख्यायंते॥ तत्रादौ प्राणायाममंत्रः॥ ॐभूः ॐभुवः ॐस्वः ॐमहः ॐ
जनः ॐतपः ॐसत्यं ॐतत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि॥ धियो यो नः प्रचोदयात्॥ ॐआपोज्योतीरसोऽमृतं ब्रह्मभूर्भुवः
स्वरोमिति॥ भूरादिसप्तलोकप्रतिपादिकाः सप्तव्याहृतयः॥ तेषां च लोकानां प्रणवप्रतिपाद्यब्रह्मस्वरूपत्व
विवक्षया प्रत्येकं प्रणवोच्चारणं तत्सवितुरित्यादिको गायत्रीमंत्रः तत्प्रतिपाद्यमंत्रस्य ब्रह्मत्वविवक्षया तदादौ प्र
णवोच्चारणं॥ मंत्रस्यायमर्थः॥ सवितुः प्रेरकस्यात पीमिरणो देवस्य वरेण्यं वरणीयं श्रेष्ठं तद्भर्गस्तेजो धीम
हि ध्यायामः यः सविता परमेश्वरः नोऽस्माकं धियो बुद्धिवृत्तीः प्रचोदयात् प्रकर्षेण तत्त्वबोधे प्रेरयति तस्य तेजो ध्या
यामेति पूर्वेणान्वयः॥ आपोज्योतिरित्यादिकस्य गायत्र्याः शिरोऽभातस्य चांतयोः प्रणवद्वयं पूर्ववदुच्चार्यते॥ पा
आपो नदीसमुद्रादिगताः सांतिय ज्योतिरादित्यादि[illegible]कमस्ति यापि मधुररसो मधुराम्लादिषड्विधोऽस्ति
पदप्यमतं देवैः पीतमस्ति तस्य [illegible] ब्रह्म [illegible] मंत्रस्य प्राणायामांगत्वममलना दोपनिषदि ॥

३

श्रुपते॥सव्याहृतिंसप्रणवांगायत्रींशिरसासह॥त्रिःपठेदायतप्राणःप्राणायामःसउच्यते॥अथसायंकालेसंध्यां

गजलपानार्थमंत्रः॥ॐअग्निश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यःपापेभ्योरक्षंतां।यदह्नापापमकार्षं।मनसावा

चाहस्ताभ्यांपद्भ्यामुदरेणशिश्ना।अहस्तदवलुंपतु।यत्किंचदुरितंमयि।इदमहंमाममृतयोनौ।सत्येज्योतिषिजुहोमिस्वा

हेति॥व्याख्या॥योयमग्निरस्तियश्चमन्युःक्रोधाभिमानीदेवःयेन्येमन्युपतयःक्रोधस्वामिनस्तत्क्रियामकादनाःसंति

तेसर्वेपिमन्युकृतेभ्यः।मदीयकोपनिष्पादितेभ्यःपापेभ्योरक्षंतांपापिनंमांतत्पापविनाशनेनपालयंतु।किंचातीते

नाह्ना॥विभक्तिव्यत्ययः।तस्मिन्नहनियत्पापमकार्षंकृतवानस्मिकेनसाधनेनआदिभिःशिश्नांतावयवैस्तत्सर्वं

पापमहरवलुंपतुअहरभिमानीदेवोविनाशयतुपरिहिंसादिचिंतनंमानसंपापंअप्रियादिमिथ्यादिभाषणंवाचि

कंअभिचारहोमादिकंहस्तकृतंपादेनगोब्राह्मणस्पर्शादिकंपादकृतंअभोज्यभोजनमुदरकृतंअगम्यागमनं

शिश्नकृतंअथवाकिमनेनपरिगणनेनयत्किमपिदुरितंमयिनिष्पन्नंइदंपापजातंसर्वंतत्कर्तारंमांचलिंगशरीररूपं

अमृतयोनौमरणरहितेजगत्कारणेसत्येनाबाधरहितेज्योतिषिस्वप्रकाशेवस्तुनिजुहोमिप्रक्षिपामिअहमनेन

होमेनतत्सर्वंभस्मीकरोमीत्यर्थः॥तदर्थमभिमंत्रितंजलंस्वाहामदीयमुखाग्नौकृतमस्तु।अथप्रातःसंध्यांगजलपा

नमंत्रः॥ सूर्यश्चमा – सूर्यः अहर्निष्पादकः सूर्योऽधिकः परमात्मा आमन्यवः सर्वं कुर्वन्नव्यादिति॥ अथ माध्याह्निकसंध्योगजलप्राशनमंत्रः॥
आपःपुनंतु॥ पा आपः स्ताः पृथिवीं पुनंतु प्रक्षालनेन शोधयंतु। सा च पृथिवी पूता स्वयं सती मामनुष्ठातारं पुनातु शोधयतु। तथा
ब्रह्मणो वेदस्य पतिः निर्मातृः व्यत्ययः। पतिं पालकमाचार्यमेताऽआपः पुनंतु तेनाचार्येणोपदिष्टं ब्रह्म वेदस्वरूपं पूता॥ विम
क्षेराक्षराः स्वयं पूता सन्मां पुनातु अन्यभुक्तावशिष्टरूपमुच्छिष्टं पदस्ति तच्चाभोज्यं भोक्तुमयोग्यं ताद्दशं मर्त्यं कदाचिद्भुक्तं यद्दु
दुश्चरितं मन्यदपि प्रतिषिद्धाचरणरूपं मम संपन्नं तत् सर्वं परिहृत्येति शेषः॥ तत्तो मामापः पुनंतु तथा सतां शूद्रादीनां प्र
तिग्रहं तु मया कृतं तं तु पुनंतु तदर्थमिदमभिमंत्रितमुदकं स्वाहामक्षीयवक्त्राग्नौ जुहोमि अस्य मंत्रस्यार्थोऽतिद्रुष्टं यथा॥ आपः
पुनंत्विति॥ पृथिवीशब्दः शरीरवचनः इमाः आपः शरीरं पुनंतु मलप्रक्षालनस्नानपानादिभिरपां शरीरेणैव संबंधात्॥
पृथिवी शरीरं च पूतं सन्मां शरीरिणं पुनातु देहद्वारेणैव देहिनः पुण्यपापसंबंधात्॥ पुनंत्वित्यत्र पूर्वोत्तरपादस्ययोः
पुनंतु पुनातु शब्दयोर्विपर्यासः॥ कथमस्माकमचेतनानां पृथिवीपावनसामर्थ्यमिति चेद् ब्रूते। हे आपः ब्रह्मणस्प
तिरयं मंत्रराजः युष्मान् पुनातु॥ यूयं ब्रह्मपूताः एतन्मंत्रपूताः सत्यो मां पुनंतु॥ मंत्रे विसर्गलोपश्छांदसः॥ यदुच्छिष्टमि
ति पचनकाले मुखादौ बाष्पादिप्रवेशाने एतद्रूपं यदुच्छिष्टं स्त्रिषु वैगुण्यात् मार्जारादुच्छिष्टं यद्दुष्टं मयाचरितं मम ॥१२॥
ता सर्वे इमा आपः पुनंतु इमा मुखलक्षणगृहीता आपः प्राग्ऽकाले सर्वपापान्मां पुनंतु शोधयंतु। असतां च प्रतिग्रहमिति।

अयाचिताद्वत्तग्रहणाद्योग्योयः प्रतिग्रहः तस्मात्प्रतिग्रहान्मां पुनंत्वित्यर्थः ॥ अथ मार्जनमंत्रः ॥ दधिक्राव्णोअकारिषंजिष्णोर
५ श्वस्य वाजिनः ॥ सुरभिनोमुखाकरत्प्रण आयूंषितारिषत् ॥ याज्ञवल्क्य ऋषिरनुष्टुप् आपोदेवता मार्जने विनियोगः ॥ अ
हमुदकस्य स्तुतिमकारिषं करव्यत्ययः ॥ करोमि कीदृशस्य ॥ दधाति धरतीति भूमिमिति दध्यो महीधरास्तेभ्यः क्रामतिनदीरू
पेणा निःक्रामतीति दधिक्रावा तस्य पुनःकीदृशः जिष्णोः लिंगव्यत्ययः पापतलशीलकस्य अश्नोतिनिम्नं व्याप्नोतीत्यश्वस्तस्य ॥ वीत्याद्धिज
नकत्वाद्वाजो अन्नमस्यास्तीति वाजिनस्य ॥ अपि च एतादृशं यदुदकदैवतं तन्नोऽस्माकं मुखा मुखं वदनं सुपां सुलुगित्यादिनाऽऽकारः ।
सुरभि सत्यवाक्यप्रयुक्तं करत् कुर्यात् ॥ असवन्नत्वात्कृत्वं मुखस्य दोषोऽध्यमिति प्रसिद्धः ॥ किंच नोऽस्माकमायूंषि प्रतारिषत् प्रतारिषति ॥
परस्मैपदत्वादिलोपः अकारव्यत्ययः प्रतारिषत्तु वर्द्धयत्वामिति भावः ॥ आपो हि ष्ठा अंबरीष ऋषिस्त्रिो गायत्र्यः सिंधुद्वीप दृष्टाः ॥ हि शब्द ए
वार्थः प्रसिध्यर्थो यस्माद्र्थो वा ॥ हे आपो यूयमेव मयोभुवः सुखस्य भावयित्र्यः स्थ भवथ ॥ मयः सुखं भावयंति मापयंति ॥ तामयोभुवः
यस्मात्कारणान्मयोभुवःस्थेति वा ॥ स्नानपानादिहेतुत्वेन सुखोत्पादकेन हेतुत्वमपाम् प्रसिद्धं तास्तादृश्यो यूयं नोऽस्मान् ऊर्जे रसाय भ
वदिपरसानुभवार्थं दधातनस्थापयत ॥ तप्तनप्तनथनाश्चेति लोपस्तस्य मध्यमबहुवचनस्य तनबादेशो दधातनेति रूपं ॥ यथा वयं सर्व
स्योपभोग्यस्य रसस्य भोक्तारो भवेम तथास्मान्कुरुतेति भावः ॥ किंच महे महते रणाय रमणीयाय चक्षसे दर्शनाय च अस्मान्दधात
नेत्यनुवर्त्तते ॥ महद्रमणीयं दर्शनं ब्रह्मसाक्षात्काररक्षणं पलं तदस्माकं कुरुत ॥ अस्मान् ब्रह्मसाक्षात्कारानुभववतः कुरुतेति भावः ॥
योवः ॥ हे आपः शिवतमः कल्याणतमः आरोग्यादिफलप्रदः वः युष्माकं यो रसः सारविशेषः माधुर्यलक्षणो विद्यते तस्य नः अस्मान् भाज

यत्तभाजनेस्यानेकूरुत।पुष्ठक्षीयमधुररसो।स्मान्स्तुतिष्ठतित्यर्थः।यद्वालस्पतिविभक्तिव्यत्ययः।लस्पतेरसंनो।स्मान्भाजयतप्रापयतेत्यर्थः।सर्वा
स्वरिस्तुसर्वतोदेशेषुकेनापिनिमित्तेनसंचरतामस्माकंपानीयान्युदकानिश्चायादिकप्रकाररसनेतिशेत्याघामयमदानिचसंतितानितान्नु
दकान्यद्वेननाप्रसादनमधुरस्यरसानिनीरोगतामदानिचमत्यास्त्विस्यभिप्रायार्थः।।अस्मुष्मिन्नर्थेदृष्टान्तोपादानं।उशतीः।वशकांतौविभक्ति
व्यत्ययः।उशत्यःकामयमानाःअपत्येषुप्रीतिमत्यइत्यर्थः।मातरोजननन्यआत्मजान्दःशिवतमरसंक्षीरःपाद्मिमधुररसोचेतनंत्राकंसप्रदिशु
कमदक्षणादिचभाजयंतिप्रापयंतित्यर्थेतद्वस्मिन्नरंगमोहेआपःअस्मान्भाजयतेतिमंत्रार्थः।।तस्मैकिंच।हे [illegible] आपःयस्यंयस्यपुरुषस्यक्षेन
कस्यपस्यकस्यचित्यजमानस्यक्षयायक्षितिनिवासगत्योःनिवासायगृहक्षेत्रप्रदानायेत्यर्थः।।जिन्वथप्रीतिंकुरुतेत्यर्थः।।जतोभता
र्थंनंवोव्ययः।छंदसिसतेविध्यपोवैकल्पिकाइतिहिवैयाकरणानोपरिभाषा।।देवतानामेषःस्वभावः।।यदुक्तानांप्रीतिसंपादनंहेआपः
तस्मैव्यत्ययेनपंचमीतस्मैतस्मादपिपूर्वंयजमानाद्विशेषतथा।स्मान्जिन्वथेत्यनुवर्त्तते।।गृहक्षेत्रादिप्रदानेनप्रीणयतेत्यर्थः।।।।
जिन्वतिःप्रीणनकर्मा।किंचअलरंगमामवोअस्मान्नरंअत्यर्थंगमामप्राप्नुम।।किंचहेआपोयूयंनो।स्मान्जनयथप्रजोत्पादनस
मर्थान्कुरुथमध्यलेलुङ्ः।उत्तमबहुवचनेगमामेतिरूपं।।अस्मावआर्षःबहुलंछंदसीतिशपोलुकिलोटिरूपं।।३।।हिरण्यवर्णाःशुचयः
पावकाःयासुजातःकश्यपोयास्विन्द्रः।अग्निंयागर्भंदधिरेविरूपास्तानआपःशंस्योनाभवंतु।।यासांराजावरुणोयातिमध्येस
त्यानृतेअवपश्यंजनानां।।मधुश्चुतःशुचयोयाःपावकास्तानआपःशंस्योनाभवंतु।।२।।यासांदेवादिविकृण्वंतिभक्षंयाअंतरिक्षे
वहुधाभवंति।।याःपृथिवींपयसोदंतिशुक्रास्तानआपःशंस्योनाभवंतु।।शिवेनमाचक्षुषापश्यतापःशिवयातनुवोपस्पृशतल ।।३।।

चमे। सर्वो भूः अग्नीषु रप्सु षदोकु रेवोमयि वर्चो बलमोजो निधत्त॥ ४॥ हिरण्यवर्णा घृतस्तस्त्रिष्टुभः॥ शौनकदृष्टाः अब्दैवताकाः साज्ञेनेवि
नियुक्ताः आपः नो। अस्मभ्यं शं भवंतु ये हि का सुखिक सौख्यप्रदाः। यास्तु आपः कथंभूताः स्योनाः। षोतकर्मणि इति धातुः मक्षिपपापा
निमंतं विनाशं गमयंत्यः स्योनाः। पुनः कथंभूताः। हिरण्यवर्णाः बोड्शवर्णाः सुवर्णसमोज्ज्वलाः। शुचयः शुचयः दीप्ते देदीप्यमानाः पावकाः
5 जगत्पावनहेतवः। पुनः कीदृशास्ताः ताः काः यासु निमित्तिव्यस्यः। याभ्योः अभ्यः कश्यपो जाताः याभ्यः इन्द्रो जातः इंद्रकश्यपोपलक्षितं सर्वे
जगदभ्यः समुत्पन्नं भित्यर्थः॥ आपो वा इदं सर्वमिति श्रुतेः॥ अपि च॥ यासमुद्रसंबंधिन्यः आपः नाभ्यवसंसमग्निं गर्भं गर्भिण्यः गर्भस्थं
धिंऽयथा तथा दधिरे दधिरे ता इति योजना॥ पुनः कीदृश्यः विरूपाः भसंपर्कं वशेन विविधरूपाः॥ २॥ किं च यासामपां राजा वरुणः प्रत्य
इद्गनधिपतिः। अस्मांऽस्यमध्ये निघमानानां जनानां सत्यानृते पुण्यपापे साक्षिवदवपश्यन्। याति इतः स्तलोगध्यति अपि
च। या आपो मधुश्चुतः मधुरसं श्चोतंति॥ श्चुतिक्षरणे॥ स्रवंतीति मधुश्चुतः मधुरसस्समुद्रचरति भावः॥ शिष्टं पूर्ववव्याख्येयम्॥
यदानामावत्तिस्य दरदर्शीपितु॥ ३॥ अपि च॥ देवा इंद्रादयः दिवि त्रिविष्टपे पीपूषरूपाण्यासामपां भक्षं॥ पच्चादिः भक्षणं कुर्वं
ति कुर्वते। तन्नो स्यादि। अपि च या आपो अंतरिक्षे रोदस्योर्मध्ये प्राणिषि भ्रमो पतिलु बहुधा बहुप्रकारा भवंति॥ अलस्य वप
जिलाया आपः पृथिवीं रत्नगर्भं पयसा पाथसा उंदंति॥ उंदिक्लेदने॥ क्लेदयंति आर्द्रयंति। शुक्राः शुभ्रकांतयः ता इत्यादि व्याख्यातं॥ ४॥
शत्यं मंत्रत्रयेण परोक्षमब्देवता अभिष्टत्य शिवेणापरोक्षं तात॥ अभीष्टवीति॥ हे आपः भो अब्देवताः यूयं मां शिवेन कल्या
णकारिणा सानुग्रहेण चक्षुषा नयनेन सलेन पश्यत वीक्षध्वं॥ किं च शिवया सुखकर्याः तन्वा तनुवा पुष्टिव्यं मंगलविग्रहेण मे

ममामार्जनकर्तृत्वचमापास्माभस्तकमुपस्पृशत॥किंचभोअद्वेते॰ रप्सुषदःरयंतिशद्वंकुर्वेतीतिरपःउदकप्रवाहाः तेषुर
प्सुरपिशब्दः॥अस्माद्भ्रातोःकर्तरिक्विप्॥सप्तम्याअलुक्॥तेषुसीदंतितिष्ठंतीतिरप्सुषदःपुष्करस्नानाहसंस्थानिसमर्थः॥पवास
र्णएअग्नीष्टरप्सुषदइतिसंहिताकालेनकारस्थानेरेफपठंति॥पदकालेरेफलोपइत्वासवानअग्नीअप्सुषदःइतिपदं
छिंदंति।तथासंप्रत्ययदर्शनात्त्रपाणिनिसूत्रंदीर्घादटिसमानपादेअत्रानुनासिकःपूर्वस्यतुवेतिनस्परुत्वेप्रयो
गांतरमपि॥अहिशास्त्रपूरयमध्योनुदस्वेतिअत्रापिछिलीपावकुवचननेकारस्यरुत्वंपदकालेरेफलोपस्यात्तस्मादस्मिन्
पक्षेअप्सुदवाच्यास्तुषुष्मासुसीदंतीतिव्याख्येयं।सर्वानग्नीनवाडवप्रभृतीनवह्नीनुष्मलसंस्थानहकुवे।आकृयामि
आहूयचेत्यंप्रार्थयामिभोअग्नयःवोयुष्माकंसंबंधिनर्क्षःदकुमप्रकाशनपटुतेजःपापनिवारणासमर्थंबलंओजःयद्या
कमंएतत्रितयंयुष्मदाव्हातस्मिन्मेमपिनिधत्तस्थापयत॥निधापचयथास्यानेगच्छतेति॥हेअद्वेनतेएतत्सर्वंत्वम
नुजानीहीतिभावार्थः॥६॥अथाघमर्षणामंत्रः॥द्रुपदादिवमुंचतुद्रुपदादिवेन्मुमुचानःस्विन्नःस्नात्वीमलादिवा॥पू
तंपवित्रेणेवाज्यमापःशुंधंतुमैनसः॥२॥ द्रोर्कमस्यसंबंधिनःपादाधारनादिरूपस्थानात्।स्तनयथापक्वानिपर्णानि
पतंतितथामत्तःपापंमुंचतुअपाकामस्यासमितिभावः॥छिरूकिमर्थंपोर्थंघोतिकापदाद्रुपदात्कुमसंबंधिवंतरुपस्या
नात्॥यथाफलंविमुंचतिपततिचतथाम्मांविश्वेदेवाःएनसःमुंचंतुमोचयंतुछंदस्युभयथेतिमुंचतेराशुर्धातुकत्वाणिलो
लोपः॥यद्वाद्रुपदात्द्रुवद्रत्मुमुचानइतिपदनिक्षेदःक्रमयास्यदात्रपादुकायुगलान्मुमुचानः॥पथेगभवनात्त्वुगनम ॥४॥

नाहूरोभवतिपथालथेत्यादिसमानं॥ किंचाध्वश्रमादिनास्विन्नःसंजातस्वेदःअप्सुस्नातीस्नातास्नातादपश्चतिपारि
न्युक्तेस्नात्प्रत्ययस्यआकारस्यछांदसईकारः॥ यथामलात्पृथग्भवतियथावापवित्रेणवस्त्रादिनाघृतंप्रतंगालितं
सन्नमक्षिकादिभ्यःपृथग्भवतितथेतिमंत्रार्थःऽध्वच्छ्रणकारार्थे॥ अथमाध्यान्हिकार्घ्यदानमंत्रः॥ हंसःशुचिषद्व
6 सुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्॥ नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतंबृहदिति॥
पःऋतमान्विवेकेनमायांपरित्यज्यनित्यस्वसर्वंमयिजगद्रूपेणावभासतइत्ययमर्थोत्रप्रदर्शितो॥ तदर्थमाहेजगद
नृघते॥ हंसइतिसर्वेसर्वदागच्छतीतिहंसःआदित्यःसचशुचौशुक्लेमंडलेज्योतिर्मयेसीदतीत्यंतरिक्षसत्॥ होम
निष्पादकआहवनीयाद्यग्निर्होतातद्रूपेणसोमयागागमनायांवेद्यांसीदतीतिवेदिषत्॥ अमावास्यादितिथिवि
शेषमनपेक्ष्यभोजनयाञ्चार्थंतत्रतत्रपुरुषोगच्छन्वैदेशिकोतिथिःतद्रूपेणदुरोणेषुगृहेषुपरकीयेषुसी
दतीतिदुरोणसत्॥ नृषुमनुष्येषुकर्माधिकारिजीवरूपेणसीदतीतिनृषत्॥ वरेश्रेष्ठेजीवेकाशीप्रस्थत्सादोप
जनीयदेवरूपेणसीदतीतिवरसत्॥ ऋतेसत्येवैदिकेकर्मणिफलरूपेणसीदतीतिऋतसत्व्योमन्याकाशेनक्ष
त्रादिरूपेणसीदतीतिव्योमसत्॥ अब्भ्यःनदीसमुद्रादिगताभ्यःशंखमकरादिरूपेणजायतइत्यब्जाः॥
गोभ्यःक्षीरादिरूपेणजायतइतिगोजाः॥ ऋतेसत्यवदनेतस्मात्कीर्तिरूपेणजायतइतिऋतजाः॥ अद्रिभ्यःवृक्षादि
रूपेणजायतइत्यद्रिजाः॥ हंसइत्यारभ्यअद्रिजाइत्यंतेनोक्तंप्रपंचजगदस्तितज्जागदृतंसत्यंबृहत्ब्रह्मअज्ञाननिद

ध्याज्जगद्रूपेणाभासमानंसर्वेशानिष्ठमाब्रह्मैवेत्यर्थः॥१॥अथावाहनं॥आयातुवरदादेवीअक्षरंब्रह्मसंमितं॥गायत्री
छंदसांमातेदंब्रह्मजुषस्वमे॥यदन्हात्कुरुतेपापंतदन्हात्प्रतिमुच्यते॥यद्रात्रियात्कुरुतेपापंतद्रात्रियात्प्रतिमुच्यते॥
सर्ववर्णेमहादेवीसंध्याविद्येसरस्वति॥ओजोसिसहोसिबलमसिभ्राजोसिदेवानांधामनामासि॥विश्वमसिविश्वा
युःसर्वमसिसर्वायुरभिभूरोंगायत्रीमावाहयामिसावित्रीमावाहयामिसरस्वतीमावाहयामिछंदर्षीनावाहयामिश्रिय
मावाहयामिगायत्र्यागायत्रीछंदोविश्वामित्रऋषिःसवितादेवताग्निर्मुखंब्रह्माशिरोविष्णुर्हृदयंरुद्रःशिखापृथिवी
योनिःप्राणापानव्यानोदानसमानासप्राणाश्वेतवर्णासांख्यायनसगोत्रागायत्रीचतुर्विंशत्यक्षरात्रिपदाषट्कुक्षिःपं
चशीर्षोपनयनेविनियोगः॥आयात्वितित्रयोमंत्राःअनुष्टुभोअंत्योबृहतीछंदस्कःविश्वामित्रऋषिःगायत्रीदेवता
आवाहनेविनियोगः॥अत्रयद्यपिओमित्येकाक्षरंब्रह्मेत्यादिप्रथमंपठित्वाव्याख्येयंतथापिसांप्रदायिकत्वात्स्प
ष्टार्थत्वाच्चनपठितंनव्याख्यायतेच॥अतःआयात्वित्यादिपठित्वाव्याख्यायते॥भगवतीगायत्रीआदित्यमंडलादस्मद्धृ
दयंप्रतिआयातुकीदृशीवरंवांछितंददातीतिवरदादेवीदीप्यमानाकिंचअक्षरंविनाशरहितंसंमितंसम्यग्वेदांतैः
मितंनिरूपितंअनुमानैःक्षित्यादिकंसकर्तृकंकार्यत्वाद्घटवदित्यादिभिरनुमितंवागागमादिभिरूपमितंयत्ब्रह्मवृत्ते
नैतन्निरूपयंतीत्यध्याहारः॥पुनःकीदृशीछंदसांवेदानांमाताएतादृशीयागायत्रीदेवतासामेममहृदयकमलस्थमि
दंप्रत्यक्षंपरंब्रह्मजुषस्वपुरुषव्यत्ययःजुषतांप्रीत्यापातुगायत्र्याप्रीतंब्रह्मममसुखप्रदंभवत्वित्यर्थः॥किंचहेगा ॥५॥

यत्त्रिवङ्कृतः पदन्हात् यस्मिन्नहनि पापं कुरुते तदन्हा तस्मिन्नहनि तेन पापेन प्रतिमुच्येत विमुच्यतो ऽस्मद्भयादिति भा
वः॥ पद्भ्यां त्रिपात् यस्यां सा त्रैलश्वा त्रिपा तस्यां सा त्रै अन्यासमानं॥ एते ध्यांदस्ताः प्रयोगाः॥२॥ अपि च हे सर्ववर्णे हे काम
रूपिणि हे महादेवि हे देवताश्रेष्ठे हे सन्ध्याविधे सा पं प्रातः सन्ध्यो भवा संध्याता दृशी पाविधा अनुष्ठानरूपा ततः संबुद्धौ हे सं
ध्याविधे हे सरस्वति त्वम् ओजः कान्तिरूपमसि ओजस्विनीत्यर्थः॥ सर्वत्र लिंगव्यत्ययः॥ सहः सहमर्षण इति धातोः सह
स्विनी शत्रुविनाशिनीत्यर्थः॥ बलं बलवती भ्राजः अतिदीप्तिः लद्दूती त्वमसि देवानामिन्द्रादीनां धाम स्थानमसि
7 देवास्त्वयि तिष्ठन्तीति भावः। हे गायत्रि त्वमेवंविधा सती नो ऽक्षैरे तिभावार्थः॥ नामशब्दः पूर्वोक्तार्थप्रसिद्धिद्योत
कः॥ अत एव त्वं विश्वं सर्वं जगदसि विश्वायुः सर्वजगज्जीवनमसि सर्वमसि सर्वायुरिति पूर्वस्य स्पष्टीकरणार्थं
अभितो भवन्ति भूतानि यस्याः सकाशात् सा अभिभूः सर्वजगज्जननीत्यर्थः। उत्तरवाक्यजातं स्पष्टार्थं पञ्चशीर्षो
पनयने विनियोगः इत्यत्रैतल्लघ्वाख्या संप्रदायो ऽक्षेपः॥ अथ प्रातरुपस्थानमन्त्रो विव्रियंते॥ मित्रस्य चर्षणीधृतः श्र
वो देवस्य सानसिं॥ सत्यं चित्रश्रवस्तमं॥ मित्रो जनान्यातयति प्रजानन्मित्रो दाधार पृथिवीमुत द्यां॥ मित्रः
कृष्टीरनिमिषाभिचष्टे सत्याय हव्यं घृतवद्विधेम॥ प्र स मित्र मर्तो अस्तु प्रयस्वान्यस्त आदित्य शिक्षति व्रतेन॥ न हन्यते
न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात्॥३॥ तत्राद्या ऋग्गायत्री द्वितीया त्रिष्टुप् ना गायत्री तृतीया बृहस्पती आ
साम्रचां ऋषिर्भरद्वाजः मित्रशब्दवाच्यः आदित्यो देवता उपस्थाने विनियोगः॥ उपस्थानं नाम वैदिकैर्मन्त्रैर्मनोर
थसिद्धये देवताभ्यर्थनं॥ अह[illegible] सानसिं सनातनं यथा भवति तथा अभ्यर्थये॥ सर्वस्य

कीदृशः भुवनानां कमलानां भक्तिभाजां वा मित्रस्य सख्युः॥ पुनः कीदृशस्य चर्मणीति त्रिलोकीं धरति प्रकाशप्रदानेन धारयती
तिचर्षणीधृत्॥ तस्य देवस्य अंधतमस्य सवितुर्जिगीषोः श्रवः कीदृक् सत्यमवितथं पुनः कीदृक् चित्रमभ्रुं तं यथा भ
वति तथा श्रूयते चतुर्दशसु भुवनेषु आकर्ण्यते इति चित्रश्रवः अतिशयि तं चित्रश्रवः चित्रश्रवस्तमं॥ अतिशाय
नेतमप्॥१॥ मित्र इति॥ पापिनो जनान्मित्रो भगवानादित्यः उष्मावर्षानिलतापशीतादिरूतानि रणांसि प्रजानन्मनसि
विजानानः सन्यातयति यातनाबलैः करोति पीडयतीत्यर्थः॥ अपि च मित्रः भगवान् द्यां शुः पृथिवीं चामुतद्दिवम
पि दाधार तुजादीनामभ्यासस्य दीर्घश्छन्दसि॥ द्यावापृथिव्यादि जगद्दाधारोऽपि स एवेति भावः॥२॥ अपि च॥ मित्र इति॥ मित्रो
भगवानर्यमा कृष्वंते आकृष्यते पुण्यपापैः पीड्यं लहति॥ कृष्टयः प्रजाः ताः कृष्टीः॥ अनिमिषा अनिमिषेण सुपां सु
लुक्पूर्वसवर्णेत्यादिना तृतीयायाः आजादेशः तादृशा स्वेन नयनेन पुण्यपापपरीक्षापूर्वकं॥ अभिचष्टे पश्य
ति॥ अतएव तादृशाय सत्याय असत्यधर्मवर्जिताय मित्राय॥ घृतमस्यास्तीति घृतवत्॥ आज्याभिघारितं
सौर्यं चरुं निर्वपेदिति शास्त्रसिद्धं हव्यं पुरोडाशादि विधेम प्रयच्छाम इति भावः॥ किंच हे सवितः स्वकीय मित्रस
हित हे सकृद्दुं वेत्यर्थः॥ हे सूर्य मर्तः अस्मदीय पशुत्रादिरूपो मर्त्यः॥ यलोपः छान्दसः प्रयः प्रियो यस्यास्तीति प्रयस्वान्
प्रास्तु प्रकर्षेण भूयात् त्वया विहिता स्वेति उपसर्गक्रियापदयोर्व्यवधानं अपि च अदितेः देवमातुरपत्यमा
दित्यः तत्संबन्धे हे आदित्य ते तव संबंधिना व्रतेन यः कश्चित्त्वदात्मनाः शिक्षति स्वकीयदेहं शिक्षति तक्षपं
व्रतमुद्दिश्य उपवासहविर्भो[illegible]नादिना [illegible] मातं कृषीवलो तिष्ठ आत्मनाः मृत्युना न हन्यते किं तस लोमव ॥६॥

न्ति॥ शत्रुभिर्न जीयन्ते किंतु विजयी भवंति॥ हे आदित्य त्वः अतः इति पदच्छेदः॥ यतः त्वं बहूतवान् ब्राह्मणाः अतः अस्मात्कारणा
त् हे अवस्मरोरण नं ब्राह्मणांत्वबहूतार्थंराशीरैकं वैयंतं अंहः पापं न अश्नोति लटो लोटि लास्पर्थे अशत्स्यात्तेन व्याप्नोतु निरंहा
भवेरित्यर्थः॥ अपिच अंतितो अंतिके समीपे पि दूरादपि एनं अंहो नाश्नोतु हे अदिति पुत्र तावकमनुग्रहबुद्धिरुपपद्
8 चाद्विव्रतनाम्भवति स निष्पापः सन् अपमृत्युरहितः सन् सर्वतो विजयी भवतीति त्वः त्वं विंदुस्थाने विसर्गप्राप्तिश्छांद
सी॥ अनुग्रहाशीतिभावार्थः॥२॥ अथ मध्याह्ने उपस्थानं आसत्येन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च हिरण्ययेन स
विता रथेना देवो याति भुवनानि पश्यन्॥ हिरण्यस्तूप ऋषिः त्रिष्टुप्॥ सविता देवो हिरण्ययेन रथेन आयाति आगच्छति किं
कुर्वन् सत्येन अन्हा रजसा रजः शब्दवाच्यमालिन्यवत्या रात्र्या च अहोरात्राभ्यां सहेत्यर्थः॥ आवर्त्तमानः नभोमंडले न उदयास्त
शैलौ प्रभृतीति मोकुर्मुत्स्येन आवर्त्तिं कुर्वन्निति भावः॥ सत्यस्य सत्यमित्यादौ सत्यशब्दः सूर्यवाचितया प्रसिद्धः तद्
त्वान्मृक्षणा सत्यशब्दोऽहर्वाचकः रजः शब्दस्य मालिन्यपर्यायत्वात् रात्रिवाचकत्वं अमृतं देवादिकं मर्त्यं मनुष्यादिकं च निवेशय
न् स्वस्वप्रदेशेषु स्थापयन् भुवना विभक्तेराकारः भुवनानि विपश्यन् कानि साधु कुर्वंति कान्यसाधु इति विचारयन्॥१॥
उद्वयं तमसस्परि पश्यंतो ज्योतिरुत्तरं॥ देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमं॥२॥ सूर्यदेवत्या अनुष्टुप्॥ प्रस्कण्व ऋषि दृष्ट
वयं तमसस्परि तमसः सकाशात् तमोबहुलात् अस्माल्लोकात् उद्गम्य उद्गताः निर्गताः ईदृशा वयं उत्तरं उत्कृष्टतरं
ज्योतिः स्वर्गं पश्यंतः॥ ईक्षमाणाः किंच देवत्रा देवलोके सूर्यं देवं पश्यंतः सेतः उत्तमं ज्योतिः ब्रह्मरूपं साक्षात्कृत्य उद्ग
न्म प्राप्ताः॥२॥ उदु त्यं जातवेदसं देवं वहंति केतवः॥ दृशे विश्वाय सूर्यं॥३॥ सोक्षि गायत्री प्रस्कण्व दृष्टा तृतीयपादः सप्तार्णः

उनिपातःपादपूरणःत्वमित्यध्याहृत्यछंदसःलघ्वर्थेकेलनोरस्मयःत्वंतंप्रसिद्धंसूर्यंदेवंउद्वहंतिदेवादानाद्योतनाद्वेति
यास्कः।किंभूतंसूर्यं।जातवेदसंजातंवेदोधनंयस्मात्॥तत्किमर्थमुद्वहंतिविश्वायदृशेषष्ठ्यर्थेचतुर्थीविश्वस्यद
र्शनायजगद्द्रष्टुमित्यर्थः॥दृशेविख्येचेतितुमर्थेनिपातः॥३॥चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः॥आ
प्राद्यावापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्च॥सौरीत्रिष्टुप्।चित्रमाश्चर्यंदृष्टापरापररूपेणस्थितःसूर्योऽत्रस्तूयते।
सूर्यः।चित्रंआश्चर्यंयथातथाउदगात्उदयंप्राप्तःउत्पतितिवालङर्थेलुङ्॥उदयन्नेवस्वतेजसानैशंतमोहंतिअन्येषांज्योतींष्या
च्छन्नत्वाश्चर्यं॥किंभूतःसूर्योदेवानांदीव्यंतिद्योततइतिदेवाःकिरणाःतेषांमुखमास्यमित्यर्थः॥यद्वाअनीकंसमूहःकिर
णपुंजइत्यर्थः॥तथामित्रस्यवरुणस्याग्नेश्चक्षुःनेत्रंप्रकाशकइत्यर्थः॥मित्रादयउपलक्षणाःसर्वस्यदेवमनुष्यस्यवि
श्वस्यरूपाणिसूर्योदयेभिव्यज्यंते अतोमित्रादीनांचक्षुःसःसूर्यः।उदितःसन्द्यावापृथिवीदिवंभूमिंअंतरिक्षंचआपूरितवा
न्आप्राःपूरयतिस्वतेजसेतिभावः॥एवंसपररूपेणस्तुत्वापररूपेणस्तौति॥किंभूतःसूर्यःजगतोजंगमस्यतस्थुषःस्था
वरस्यचजगतआत्मांतर्यामीयमेतमादित्यपुरुषंवेदयतेसइंद्रःसप्रजापतिस्तद्ब्रह्मेतिश्रुतेः॥सूर्याद्वैतमनेनोच्यतइतिभा
वः॥४॥तच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत्।पश्येमशरदःशतं।जीवेमशरदःशतं।नंदाम।मोदाम।भवाम।शृणवा।
मप्रब्रवाम।अजीताःस्यामशरदःशतं।तच्चक्षुःसूर्यदेवत्यात्मात्रिष्टुप्॥यत्तेमंत्रैर्महान्सूर्यःअस्माभिःस्तुतःतच्च
क्षुर्जगतांनेत्रभूतमादित्यरूपंपुरस्तात्पूर्वस्यांदिशिउच्चरत्उच्चरतिउदेति॥तत्रअलोपःपरस्मैपदेश्तिपितिलोपः
शीघ्रत्वात्।देवहितंदेवैर्हितंनिर्मितंस्थापितं।यद्वादेवानांहितंप्रियंपश्येमशुक्लंपापासंस्पृष्टंशोचिष्मद्वास्यप्रसाद ॥२॥

स्पर्शयेम शरदः शतं स्पष्टचक्षुरिंद्रिया भवेम शतं शरदो जीवेम अपराधीनजीवना भवेम ॥ शरदः शतं मोदाम हर्षं प्राप्नु-
पामः शतं शरदः नंदाम आनंदं प्राप्नुयामः शतं शरदः भवाम श्रोतं स्मात्तैककर्मकर्तुं समर्था भवामः शरदः शतं श-
णुवाम स्पष्टश्रोत्रेंद्रिया भवेम शरदः शतं प्रब्रवाम अस्खलितवागिंद्रिया भवेम शरदः शतं अजीताः प्रेक्षेषु भि
रजिताः स्याम जयपते दृशे च श्छांदसः ।ऽ ज्योक्च सूर्यं दृशो ॥ य उदगान्महतोऽर्णवान्विभ्राजमानः सरिरस्य मध्यात्
स मा वृषभो लोहिताक्षः सूर्यो विपश्चिन्मनसा पुनातु ॥ अस्य त्रिष्टुप् छंदः याज्ञवल्क्य ऋषिः आदित्यो देवता ॥ यो
भिस्त्वपं चिरकालं वा चक्ष ॥ अहं चिरं सूर्यं दृशोपरूपाभिव्यत्ययेन शप आत्मनेपदे उक्तमेकवचनं दृशो विरव्वेचेतिनि
९ पातेव्ययमेवार्थः ॥ एतेन चिरकालं जीविष्यामीत्यपि द्योतितं अन्यथा तद्दर्शनासंभवात् किंच स सूर्यो मां मनसा
अंतःकरणपवित्रकेन भावेन पुनातु स कः यो महतोऽर्णवाद्गंभीराद्दर्शनाद्ज्ञानपात्पारावारादत एव सरिरस्य स
लिलस्य मध्यात्रत्नेपोरमेदः उद्गात् उद्गच्छति उदेतीति यावत् ऽ उ॰ वर्तमानि कोदृक्॰॰व्यः स कीदृग्विभ्राज
मानः त्रिलोकीनायिकावदनपंकेरुहं विद्योतयमानः तथा वृषभः त्रयस्त्रिंशत्कोटिदेवताश्रेष्ठः मेघरूपेण वर्षु
को वा तथा लोहिताक्षः स्फुटं ॥ तथा विपश्चिन् सूर्यस्य वै पश्चिात्येन नाम त्रिलोकीस्वरूपाभिज्ञाता ॥ अथ सायमुपस्थानं ॥
ऽमं मे वरुणघृषीहवमद्याचमृऽया । त्वामवस्युराचके । गायत्री शुनःशेपदृष्टा वरुणा देवता ॥ हे वरुण त्वं ममइमं
हवं आह्वानं श्रुधी शृणु ॥ शश्रुपिनिति हेर्धिः संहितायां दीर्घः ॥ च पुनः अद्य दिने मृ॰डयास्मान्सुखय यतोऽहं त्वामाच

के कामये आचक्र इति कांतिकर्मो कीदृशोऽहं अवस्युः अवनं अवः पालनं अवतेरसुन् त्वामिच्छामीत्यर्थः॥ तत्त्वा यामि ब्रह्म
णा वंदमानस्तदाशास्ते यजमानो हविर्भिः॥ अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः॥ त्रिष्टुप् शुनःशे
पदृष्टा वरुणदेवत्या हे वरुण हे मतीवीनायक त्वा त्वां शारणं यामि कीदृगहं ब्रह्मणा वैदिकेन मंत्रेण वंदमानः त्वामुप
तिष्ठमानः किमर्थमिति चेच्छृणु यः कश्चिद्यजमानो हविर्भिर्यागैस्स्तवैः तत् तदिति पदस्य पर्यायः तत्परः आशास्ते
अभ्यर्थयते स्वर्गादिकं तदहं त्वत्तो लब्धुमिति योजना अपि चेहास्मिन् संसारे आस्माकीनां मा गोऽसि ध्वसि त्वा अत
एनाहेडमानो अव्याकुप्यन्तः अस्माकं आयुः मा प्रमोषीः मा चोरय मा विनाशय अपि त्वस्मात् क्षिप्रं युष्मतः कु
पितिभावः॥ मुषस्तेये अस्माल्लुङि छंदस्य माङ्योगेपीत्यडभावः उरुः शंसः शंसनं प्रशंसा यस्य तत्संबुद्धौ हे उरुशंस त्वं
कथंभूतः नो धो नियगोचरावबोधोपस्य स त्वं बोधी॥२॥ यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतं॥ मिनीमसि द्यविद्यवि॥३
गायत्री वारुणी येचाभिविहि हे वरुण हे भक्तपापनिवारण ये विशो मनुष्यास्त्रैवर्णिकास्ते तव संबंधि व्रतं त्व हे वताकंक
र्मेति यावत्॥ यथा सादृश्ये इति पाणिनिस्मरणात् यथाशब्दः सादृश्यवाचकः तथा च यथा सदृशांस्तव तव व्रती प्र
मानुरूपं यत्र यथानुतिष्ठंति हि तर्हि हे हे देव दीप्यमानशरीर त्वं स्तान्वर्णिन आ प्रमिणा स्वदेहपातांतं ते द्यविद्यवि
दिविदिवीति यावत् तत्तत्कर्मफलानुरूपे स्वर्गे इति यातपितुं मंत्रेणाभीप्सा प्रापो जि प्रमिनीमसि माध्वाने वर्तने ॥८॥
चेति धातुपाठात् प्रकर्षेण वर्तयसि स्यापपसीत्यर्थः॥ त्वं कीदृशः चिरस्थिरस्वरूपोऽज्ञानेस्वरूप इत्यर्थः॥ अस्मि

मैत्रैकानि निचिसदान्यध्याहृतानि प्रवृत्तानि ॥ ॐ ॥ यत्किंचेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि ॥ अचित्ती यत्त
व धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ॥ ५ ॥ त्रैष्टुभी वारुणी यास्या वक्ष्यमाणस्पष्टा ॥ हे वरुण स्वप्रतापेन नि
खिलजगत्पालक हे देव तस्मादेनसोऽहंसः नोऽस्मान् मा रीरिषः नरकपातादिना मा पीडय किंतु लिङ्गोऽनाशपस्व
र्गादिप्रदानेन सुखयेत्यर्थः ॥ हे रिषो हिंसायां अस्माद्रीरिषः इति लुङि माङ्योगादडभावः प्राप्तिः समामामासा आघ
स्य माऽन्ये ह्रस्वश्चदसः ... मा सा प्रामवरूपम हिंसाकरणं बोध्यते तस्मात्कस्मात् यत्किंचिदेकं तं त्रिपमाणं करिष्यमा
णामेनस्तस्मादिति योजना कस्मिन्विषये दैव्ये त्रैलोक्यादित्यादिसाध्ये यस्माद्दैवे देवताविषये जने मनुष्यविषये च तदुपल
10 क्षितत्तिर्यगादिविषये च अपराधां संमानलाऽनादिरूपमेनः चरामस्या चरामो वयं ॥ इदंतो मसीति साधु कीदृक्षाः संतो व
यं मनुष्याः भौमाः संतस्तियावतः भौमानां प्राणिनां प्रायेणारजस्वित्वात्तमस्वित्वाच्चेति भावः अत्र क्रियाविशेषणं ॥
अभिद्रोहं ॥ द्रुह जिघांसायां सर्वतो हिंसनं यथा भवति तथेत्यर्थः ॥ अपि च हे प्रतीचीदिङ्नायक तस्मात्त्वमेनसो नो मा शरि
षः एतेनापि शब्दो व्याख्यातः तस्मात्कस्मात्तव संबंधि यत् अचित्ती अपरिज्ञानं ॥ छांदसो दीर्घः वेदशास्त्रपर्यालोच
नालेत्वा त्वत्स्वरूपस्य मया अपरिज्ञातत्वात् त्वत्स्वरूपपरिज्ञानसंपादनाभावरूपमप्येनस्त्वमर्थः ॥ एनः कीदृशं धर्मा युयुपः पु
मिश्रणाभिश्रणयोः अस्मादस्तु निष्पत्तिर्येकवचनं ॥ अत्र मिश्रणांगत्यते धर्मेणा स्वधर्मेण अयुयो अभिश्रितं स्व
धर्मवर्जितरतिपानतः ॥ तृतीयपादस्यायमभिप्रायः हे वारुणीपते वयं लुब्धा मन्तरणा एषोऽस्माकं स्वधर्मं यद् दुराध्य
यन तदर्थविचारतदुक्तानुष्ठानानि यदि देवधर्मे न चारिष्याम तद्यथार्थत्व स्वरूपमपि व्यज्ञास्याम इति सुकरोयमर्थः

तदभावात्तदभावइतिव्यापकाभावेव्याप्याभावनिश्चयःअतएवप्रमादालस्यादिभिःस्वधर्माद्भ्रष्टानयंतानामनिस्तानंतंलःअ
तएवत्वत्स्वरूपापरिज्ञानेस्वधर्मरहितमितिचतुर्थपादेनप्रार्थयांजि॥अतोभोभगवन्नुमंमेवरूणेस्यादिभिर्मन्त्रैस्त्वांस्तुप
तिष्ठमानाःप्रांजलयोवयंयाचामहेतस्मादेनसोमारीरिषइतिसर्वमवदातं॥४॥कितवासोयद्रिरिपुर्नदीवियद्वाघा
सत्यमुतयन्नविद्म॥सर्वाताविष्यशिथिरेवदेवाथातेस्यामवरुणप्रियासः॥अस्यार्थःचोनुष्टुप्छंदःऋषिर्वसिष्ठःवरुणोदे
वतावरुणःहेदेवशिथिलितिधात्वर्थप्रुत्कहेवरुणस्वप्रतापेनजगदावरणादिविनिग्रहादिनेविद्यमानेयत्सुखंकितवाएतकित
वासःधूर्ताःवैदिकपंथानमुपेक्षाद्दललौकिकध्यानःत्रैवर्णिकाअन्येवानरिरिपुःन[illegible]लेभिरेध्यत्ययेनलभंतेन
लभिष्यंतेवा॥रिरआलंभनेअस्माद्लुङ्लिङ्कर्मणःशापिलिङिप्रथमपुरुषबहुवचनंअपिचायद्वाविविद्यमानेस्तुधापीस्प
स्पर्शोजयैराबणोघेःप्रवआरोहणानंदनवनासमप्रभृतिसोस्यंयद्वापदस्यस्माद्दरोअन्येनपंचमेदंभाग्याःसंतोनवि
मनप्राप्नुयन्तउतयद्वचदस्यलब्धत्वेनएनानामःउतावधारणेतदेवसुखंप्रसादात्दस्मभ्यंभूयादित्यध्याहृत्ययोजयित
व्यंतत्सुखंकथंभूतंअघसत्यंअघमल्पमनल्पमेवापापमसत्यंमषाअभावीमलेयस्यलब्धासत्यमितिवकुञ्शीहिःपाप
लेशावर्जितेपुण्यैकलभ्यमितिभावःकिंचहेवरुणसर्वाःसर्वाःतातारूपभयत्रसोर्केरूपसिद्धःसक्षिपमनोवत्तीःवि
ष्यएवविष्णुप्राप्तौदिनादिःमध्येमेकवचनेअवरपंचाप्रमृतौल्यपः॥मदीयंचेतःसर्वप्रकारैस्त्वामेवचिंतयतीत्यभिप्रा
यःत्वंकीदृशःशिथिलयाप्तिविनाशापत्तिमत्कापवर्गप्रतिवंचमितिशिथिःशिथविश्लेषणे॥अथैवेसतिपस्मादित्थं
विधानोंध्यास्माकंतस्मात्तेतवकथंप्रियाएवप्रियासःआज्जसेरसुगितिस्वार्थिकोअसुक्प्रत्ययःमित्रभूताःस्या ॥९॥

मभवेमेत्स्यां शिवमाशास्महे॥५॥ नमः प्राच्यै दिक्त्रोद्धमाक्षीनी सहयज्जुर्व्याख्यापकोक्तानि निमित्तस्य त्वर्थानी संख्याख्यातानि॥ उत्तमे शिखरे जा
ते भूम्यां पर्वतमूर्द्धनि॥ ब्राह्मणेभ्योभ्यनुज्ञाता गच्छ देवि यथासुखं॥ अस्यानुष्टुप् छंदः गर्ग ऋषिः गायत्री देवता गायत्री विसर्जने
विनियोगः॥ संप्रति गायत्री विसर्जने मंत्रो व्याख्यायते॥ हे उत्तमे सर्वदेवतोत्तमे तेरूपे गायत्री पुनः पंचाशत्कोटियोजनविस्तीर्णा
यां भूम्यां मध्यवर्त्तिनि पर्वते कनकाचले तत्रापि तक्षिपनामनेकानां शिखराणां मध्ये मध्यवर्त्तिनि शिखरे अत एव पर्वतशिरस्थ
ऊर्द्धनि स्वमेरुशिखरोत्तुंगप्रदेशे हे जाते परमात्मनोत्पादिते गायत्रि इत्थं किल पौराणिकाः कथां कथयंति सर्वब्रह्मांडमुत्पाद्य
परमात्मा यदा गायत्रीं त्रिनेत्रीं सारां त्रिपदामुत्पादयामास तदा पर्वतराजस्य कनकमहीधरस्य मूर्द्धि स्थितोत्पादयामासे
त्रिहे गायत्रि सर्वदा त्वदावासभूतात्सौराज्जमंडलादागत्यास्मद्दत्तार्घोदकेन सहैकीभूयस्तूर्पपथविघ्नकृत्तॄन् राक्षसानपिनि
हत्य स्क्रूरपापपुरुषस्य पुनरेसाम्मान नप्यनुज्जत्स्य कर्तव्यसमापनाद्धुतोः ब्राह्मणेभ्यो व्यत्ययेन ब्राह्मणैरस्माभिः पथा
स्थाने गच्छ दिवसे दिवसे त्रिषु कालेषु आयाहीत्येवमभ्यनुज्ञाता सती भूयोदविक्षिप्यमानविग्रहत्तदनयनेस्वावासं गच्छ यथा
सुखं मनतिक्रमेति॥४॥ स्तुतो मया वरदा वेदमाता प्रचोदयंती पवने द्विजाता॥ आयुः पृथिव्यां द्रविणं ब्रह्मवर्चसं मह्यं द
त्वा प्रजातुं ब्रह्मलोकं॥ पूर्वस्मिन्मंत्रे अपरोक्षतयोक्तोर्थोस्मिन्मंत्रे परोक्षतया स्पष्टीक्रियते॥ अत्रेदं वैदिकं रहस्यं॥ ब्रह्मलो
कं आदित्यमंडले चोभयमपि गायत्र्या आवासस्थानेन विकल्प्येनाप्यलरक्षितिके चिदाचक्षते अत एवास्माभिः पूर्वस्मिन्मं
त्रेणानुक्रमप्यादित्यमंडलं गायत्रीनिवासत्वेन मत्वाध्याहृत्य व्याख्यातं एतस्मिंस्तु मंत्रे मंत्रः स्वयमेव भगवत्या गाय
त्र्याः वसतित्वेन ब्रह्मलोकं ब्रवीति तथा चेत्थं व्याख्या॥ तत्र भगवती गायत्री ब्रह्मलोके ब्रह्मणो भारती पत्नीकं


सप्ताविति वाक्यपरिशेषः भीष्टरां ब्रह्मलोकं अतलादिभ्यो धर्स्तीनेभ्यः भूरादिभ्यः ऊर्ध्वतनेभ्यः समस्तेभ्यो लोकेभ्यः प्रकृष्ट
त्वेन स्थातः परमात्मनः सकाशादुत्पन्नं लभ्यते प्रजातस्तं प्रजातमिति वक्तव्ये प्रजातमिति प्रयोगश्छांदसः किं कृत्वा दत्ता किं किं
आयुः शतादिलक्षणमुपजीवनं पुनर्द्रविणं सुवर्णमणिमुक्तादि पुनः ब्रह्मवर्चसं स्वाध्यायाध्ययनतदर्थविचारतदर्थानुष्ठाना
नुष्ठापनैः जनितं स्फुरत्तेजः महच्छ्लोका आत्रस्तले दृश्यमानो यं साक्षात् ज्वलन्निव पावक इति कस्मै मह्यं एवं कथंभूताय पृ
थिव्यां विधमानाय कथंभूता गायत्री द्विजाता द्विजातिभिस्त्रैवर्णिकैरुपास्यमानाय छाद्यपोः सूर्यमंडलब्रह्मलोकयोः जाता प्रा
दुर्भूता जननिप्रादुर्भावे अस्माभिर्लब्धा प्रत्ययः पुनः कथंभूता प्रचोदयेती अंतर्यामिरूपेण प्राणिमात्रप्रेरयित्री अत्र दृष्टोपमानो
पादानं पवने व्यस्त्यपेन पवनः यथा प्राणवायुः पंचविधं प्राणिजातं प्रेरयति चलनं गमनादिकं कारयति तथेति वेद
माता च स्तुता मे वेदानां जननी वरानस्मोपासकेभ्यो वांछितार्थान् ददातीति वरदा कथंभूता सती मयोपासकेन स्तुतः व
कृतग्रहणाध्यस्त्यपेन स्तुता सतीत्यर्थः ॥१॥ कृत्यसंगतिवाक्यानि पौराणिकवाक्यानि च स्पष्टार्थत्वात् व्याख्याय वैदि
का एव मंत्रा व्याख्याताः ॥ तैत्तिरीयकशाखानां संध्यावंदनमंत्रगो ॥ भाष्यं दृष्ट्वा प्रीयेतां तौ यो मिथो देहधारिणौ ॥ ॥
॥ ॥इति श्रीपरमहंसपरिव्राजकाचार्यश्रीनारायणेंद्रसरस्वतीविरचितं तैत्तिरीयकसंध्यावंदनमंत्रभाष्यं समाप्तं ॥ ॥२॥

श्रीगुरुभ्यो नमः

श्री गणेशाय नमः
श्री गणेशाय नमः
श्री गणेशाय नमः

॥श्री गणेशाय नमः॥ श्री गणेशाय नमः

श्री गणेशाय
नमः





श्रीगणेशायन
म

म	प	र	स	त	ज	भ	न